श्री

मन्त्रिकोपनिषत्

[पूर्णमद इति शान्ति ।] [भद्रं कर्णभिरिति शान्ति ?]

येनोपनिषदां भाष्य रामानुजमतानुगम् ।
रच्य कृत प्रपद्ये त रङ्गरामानुज मुनिम् ॥

श्रीरङ्गरामानुजमुनिवरविरचिता

मन्त्रिकोपनिषत्प्रकाशिका ।

अतसीगुच्छसच्छायमञ्चितोरस्थल श्रिया ।
अञ्जनाचलशृङ्गारमञ्जलिर्मम गाहताम् ॥
व्यासं लक्ष्मणयोगीन्द्र प्रणम्यान्यान् गुरूनपि ।
मन्त्रिकोपनिषद्व्याख्या करवाणि यथामति ॥

श्री

श्रीमद्भ्यो रङ्गरामानुजमहादेशिकेभ्यो नम ।

मन्त्रिकोपनिषद्भाष्यपरिष्कारः

योऽधिष्ठाता विपरिणमिताचित् चितो भोजयन् सन्
लीलास्वादी निखिलनिगमस्तोमवन्द्योऽखिलात्मा ।
षड्विशस्सन् बहुलगणनागोचर सर्वहेतु
मुक्तेः सेतुर्भवतु भगवान् माधवोऽयं श्रिये न ॥

भगवता भाष्यकृता, 'चमसवदविशेषात् (४४२) इत्यधिकरणे निरीश्वरसांख्यनिराकरणाय एतदुपनिषद्व्याख्यानामुपात्ततया तदर्थव्यक्तये उपनिषदियमपि दशोपनिषद्भाष्यकारैर्व्याख्यायि । तत्र "आथर्वणिका अधीयते इत्युक्तत्वात्, अत्रापि 'मन्त्रोपनिषदन्— अथर्वणो भृगूत्तमा ' इति श्रवणात् उपनिषदियमथर्ववेदीयेति विमृश्यते । यजुर्वदीयत्वेन तु अष्टोत्तरशतोपनिषत्कोशे गण्यते । उभयत्र वा पठिता स्यात् ।

हरिः ओम्। अष्टपादं शुचिं हंसं त्रिसूत्रमणुमव्ययम्।
त्रिवर्त्मानं तेजसोहं सर्वतः पश्यन्न पश्यति ॥ १ ॥

अष्टपादं...पश्यति। त्रीणि वर्त्मानि यस्य स, त्रिवर्त्मा। सत्त्वरजस्तमोरूपगुणात्मकवर्त्मयुतं तेजसोहं ब्रह्मप्रकाशाच्छादकं ब्रह्मप्रकाशहन्तारं सर्वतः सर्वतो व्याप्तं [प्रपञ्चं पश्यन् बहिरवलोकयन् जीवः अष्टपादं प्रकृत्यष्टकशरीरकम् ?] शुचिम् अपहतपाप्मानं निरवद्यं त्रिसूत्रं सृष्टिस्थितिसंहारात्मकसूत्रशब्दितक्रियायुक्तम् अणुम् अतीन्द्रियम् अव्ययं निर्विकारं हंसं हंसवदाश्चर्यभूतं दीप्यमानत्वाद्वा विवेचकत्वाद्वा हंससदृशं परमात्मानं [न ?]। पश्यतीत्यर्थः ॥ १ ॥

अष्टपादमित्यादि। अत्र मन्त्रे उत्तरार्धस्य पूर्वं व्याख्यानात् अष्टपादमित्यारभ्य सर्वेषां द्वितीयान्तानां पदानां क्रमेण व्याख्यानाभावात्, पूर्वार्धे विशेष्यभूतः परमात्मा; उत्तरार्धे तु प्राकृतप्रपञ्चो विशेष्य इत्याशयोऽवगम्यते। अन्यथा तेजसोहमिति पदार्थः परमात्मनि नान्वेति; पश्यन्न पश्यतीत्यत्र पश्यन्नित्यस्य कर्मापि किञ्चिन्नोक्तं भवेदित्यभिसंधिः। एवञ्च भाष्ये, पश्यन् न इति पदद्वयव्याख्यानं भ्रष्टम्, अष्टपादमिति प्रथमपदव्याख्यानवत्। अन्यथा, 'न पश्यति' इति पाठं विहाय परिपश्यतीति पाठो भाष्याभिमतश्चेत्—पूर्वार्धप्रथमपदमारभ्य क्रमेण व्याख्या कृता स्यात्, द्वितीयमन्त्रावतारिका च, 'पुनः कदा पश्यति' इत्येवंरूपा, पूर्वमन्त्रे, न पश्यतीति पाठमभिमतं दर्शयति। तथा पश्यन्नित्यस्य सामान्यतः जीव इत्यर्थसंमतावपि सर्वं द्वितीयान्तं क्रमेणैकविशेष्यकं व्याख्यायेत। सर्वत्र प्रसिद्धश्च स एव, 'सर्वतः पश्यन्न पश्यति' इति पाठः इति ध्येयम्। हंसवदित्युक्तं सादृश्यं विवृणोति दीप्यमानत्वादिति॥१

भूतसंमोहने काले भिन्ने तमसि वै खरे ।
अतः (अतः) पश्यन्ति सत्त्वस्था निर्गुणं गुणगह्वरे ॥ २ ॥
अशक्यः सोऽन्यथा द्रष्टुं ध्यायमानः कुमारकैः ।
विकारजननीमज्ञामष्टरूपामजां ध्रुवाम् ॥ ३ ॥

पुन कदा पश्यतीत्यत्राह **भूत ...गह्वरे** । **काले** कालविशेषे **भूतसंमोहने** भूताना मोहजनके **खरे** घोरे **तमसि** तमोगुणे **भिन्ने**, **अतः** पर **सत्त्वस्थाः** रजस्तमोभ्यामस्पृष्टविशुद्धसत्त्वा पुमासं **निर्गुण** **गुणगह्वरे** त्रिगुणगुहान्तर्वर्तित्वेऽपि गुणसङ्गकृतदोषशून्य पश्यन्तीत्यर्थ ॥

अशक्यः **कुमारकैः**। अन्यथा तमोगुणभङ्गाभावे **कुमारकैः** तमोगुणसलीनान्त करणतया मन्दप्रज्ञै ध्यायमानोऽपि द्रष्टुमशक्य इत्यर्थ ।

विकार **ध्रुवाम्** । 'अष्टौ प्रकृतय षोडश विकारा ' इत्युक्तरीत्या एकादशेन्द्रियपञ्चभूतात्मकषोडशविकारजननीं पञ्चतन्मात्रप्रकृति-

---

भूतसंमोहने इत्यस्य तमोविशेषणत्वं भाष्याभिमतम् । ननु तस्य *कालविशेषणत्वमपि भवति । 'या निशा सर्वभूतानां तस्यां* जागर्ति संयमी । यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः' इत्युक्तरीत्या सर्वभूतनिद्राकाले रात्रौ योगिभिर्निर्वर्ध्यं योगस्य क्रियमाणतया भूतसंमोहनकालपदेन रात्रिग्रहणसंभवादिति चेन्न— दिवाऽपि योगस्य सम्यगनुष्ठानात् रात्रिरूपविशेषग्रहणे प्रमाणाभावात् । उपात्तगीतावाक्येऽपि रात्रिकालरूपार्थस्याभावात् । न हि उत्तरार्धे भूतजागरणकालस्य मुनिं प्रति निशात्वं वस्तुतोऽस्ति। अतस्तत्र न कालः कश्चिदुच्यते । किं तु एकज्ञातमन्यस्याज्ञातमित्येवेति । कालविशेषे इति । सात्त्विकत्यागपूर्वकर्मानुष्ठानमृदितकषायतादशायामित्यर्थः । अत इति पाठे जीवात्मावलोकनानन्तरमित्यर्थः । अन्तरिति पाठे अवलोकितस्य जीवात्मनोऽन्तरित्यर्थः । २

ध्यायतेऽध्यासिता तेन तन्यते प्रेर्यते पुनः ।
सूयते पुरुषार्थञ्च तेनैवाधिष्ठितं (ता?) जगत् ॥ ४ ॥
गौरनाद्यन्तवती सा जनित्री भूतभाविनी ।

महदहङ्काररूपाष्टप्रकृतिरूपाम् अज्ञाम् अचेतनाम् अजां ध्रुवाम् उत्पत्तिविनाशरहिताम् । एतेषां द्वितीयान्तपदानां पिबन्त्येनामविषमामित्युत्तरेणान्वयः ॥ ३ ॥

ध्यायते....जगत् । ध्यायते परमात्मना संकल्परूपेण ज्ञायते । अध्यासिता अधिष्ठिता तन्यते विस्तार्यते = स्थूलावस्था क्रियते, समष्टिभूतरूपेण क्रियते ; प्रेर्यते ; तेनैव परमात्मना अधिष्ठिता प्रकृतिः पुरुषार्थं पुरुषणाभ्यर्थनीयं भोग्यभोगोपकरणभोगस्थानरूपं जगत् सूयते ॥

गौ...विभोः । जनित्रीत्यनेन समष्टिसृष्टिरुच्यते । भूतभाविनीत्यनेन व्यष्टिसृष्टिरुच्यते । अनाद्यन्तवती आद्यन्तशून्या नित्या तेजोबन्नद्वारा लोहितशुक्लकृष्णरूपयुक्ता ईश्वरस्य सर्वकामदुघा लीलारस-

---

अष्टप्रकृतीति । यद्यप्यस्मन्मते पञ्चतन्मात्रोत्पन्नात् भूतात् अपरतन्मात्रोत्पत्तिस्वीकारात् प्रकृतिद्वादशकप्रसङ्गः—अथापि विकारपदं पाञ्चभौतिकशरीरे उपलभ्यमानभूतेन्द्रियपरम् । तेषामेव विकारे शरीरे दृश्यमानत्वात् । अवशिष्टानि तत्कारणानि चाष्टौ प्रकृतय इति न दोषः । शेषं सुबालोपनिषद्भाष्ये । ३

गौण्या वृत्त्या गौरित्युच्यत इति । अजां ध्रुवामित्यत्र अजापदं न छागस्त्रीवाचि । ध्रुवापदसमभिव्याहारबलादेवोत्पत्तिराहित्यरूपयोगार्थस्य स्फुटं प्रतीतेः। 'अजोऽपि सन्नव्ययात्मा' इत्यादौ अजपदस्य योगार्थे सुष्ठु प्रसिद्धिरप्यस्ति । अत एव श्रीभाष्ये चमसाधिकरणे

सिताऽसिता च रक्ता च सर्वकामदुघा विभोः ॥ ५ ॥
पिबन्त्येनामविषमामविज्ञाताः कुमारकाः ।
एकस्तु पिबते देवः स्वच्छन्दोऽत्र वशानुगाम् ॥ ६ ॥

दोग्ध्री प्रकृतिरूपा काचन गौरित्यर्थः । कामदोग्धृत्वादिसादृश्यात् गौण्या वृत्त्या गौरित्युच्यते ॥ ५ ॥

पिबन्ति...कुमारकाः । अविषमां कर्मानुगुणपरिणामित्वाद्-पक्षपातिनीम् **अविज्ञाताः** स्वात्मभिः देहेभ्यो विविच्याज्ञातास्सन्तः **कुमारकाः** अल्पप्रज्ञाः **पिबन्ति** प्राकृतं भोगं कर्मपरवशा अनुभवन्ती-त्यर्थः **एकस्तु देवः** परमात्मा **स्वच्छन्दः** अकर्मपरवशस्सन् **वशानुगां** स्वसंकल्पाधीनस्वरूपस्थितिप्रवृत्तिका ता प्रकृतिरूपां गां **पिबते** तत्कृत-लीलारसं भुङ्क्त इत्यर्थः ॥ ६ ॥

अजामेकामित्यत्र छागीपरत्वं परोक्तं प्रत्याख्यातम् । न तथा गौरिति पदं योगार्थं क्वचित् प्रसिद्धम् । अतो गौणी वृत्तिरिति भावः । सर्वकामदुघेत्यत्र विभोरित्यस्यान्वयात् जीवकामदोहनरूपार्थ-त्यागेन लीलारसदोग्ध्रीत्युक्तम् । जीवैरनुभाव्यतया विभोः कामना-विषयभूतं यद्यत् तस्य सर्वस्य दोग्ध्रीत्युक्तिसंभवेऽपि तत्रतत्र लीला-रसस्यापि स्वानुभाव्यस्य सत्त्वात् तद्विवक्षैव युक्तेति भावः ५

एकस्तु पिबते देवः स्वच्छन्द इति । न चैवम्, 'ऋतं पिबन्तौ' इत्यत्र परमात्मनः पानकर्तृत्वाभावेऽपि पाययितृत्वमस्तीत्युपपादनं किमर्थं कृतम् । अत्रोक्तरीत्या पानकर्तृत्वस्यैव संभवादिति वाच्यम्— जीवस्य सुकृतफलभोक्तृत्वम् परस्य तत्कृतभोगदर्शनाधीनलीलारस-भोक्तृत्वमित्येवेहाप्युक्तया सुकृतफलभोक्तृत्वस्य परमात्मन्यभावात्, 'ऋतं पिबन्तौ सुकृतस्य' इति जीवानुभाव्यतयोक्ते ऋते परानुभा-व्यत्वायोगेन पाययितृत्वस्यैव तत्र वक्तव्यत्वात् । ६

ध्यानक्रियाभ्या भगवान् भुङ्क्तेऽसौ प्रसभं विभु· ।
सर्वसाधारणीं दोग्ध्रीं पीड्यमाना तु यज्वभि. ॥ ७ ॥
पश्यन्त्यस्या महात्मानः सुपर्णं पिप्पलाशनम् ।
उदासीन ध्रुव हसं स्नातकाध्वर्यवो जगु. ॥ ८ ॥
शासन्तमनुशासन्ति बह्वृचा· शास्त्रकोविदाः ।

ध्यान .विभुः । ध्यानक्रियाभ्याम् 'ऐक्षत, 'असृजन' इति श्रुताभ्या सङ्कल्पसर्गादिव्यापाराभ्यामित्यर्थ । भुङ्क्ते तत्तत्लीलारसमनुभवतीत्यर्थ । शिष्ट स्पष्टम् । सर्वं . यज्वभिः । सर्वेबद्धजीवसाधारणतया फलप्रदाम्, वत्सै यथा माता क्षीरार्थे पीडिता भुज्यते, एव कर्मवश्यैरात्मभि भोक्तव्यफलानुरूपं परिणाम्यमानामित्यर्थ ।

इत्थमेव व्यासार्यैः, "चमसवदविशेषात्" इति सूत्रे व्याख्यातम्॥

पश्यन्ति पिप्पलाशनम् । कर्मफलभोक्तार शोभनपक्षयुक्त पक्षिवत् ज्ञानानन्दादिकमनीयगुणयुक्त केचन शुद्धान्त करणा महात्मान पश्यन्ति विविच्य साक्षात्कुर्वन्ति । उदासीन जगुः । तत्समीपवर्तिनम्, 'तयोरन्य पिप्पल स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति' इत्युक्त रीत्या कर्मफलाशनशून्यतया उदासीन ध्रुव व्यापित्वेन निश्चलं हंस हसवच्छुद्धमद्भुत स्नातकाध्वर्यवः—स्नातकव्रतयुक्ता अध्वर्यव येषा ते स्नातकाध्वर्यव —समीचीनयाजकानुष्ठापितयज्ञविशुद्धान्त करणा जगुः सामभि स्तुवन्तीत्यर्थ ॥ ८ ॥

शसन्त...कोविदाः । अत्र तमित्यध्याहार । त शसन्त—तं स्तुवन्तम् उद्गातृगण बह्वृचाः ऋग्वेदाध्येतार शास्त्रकोविदाः अध्यात्म-

रथन्तरं बृहत् साम सप्त वैधस्तु गीयते ॥ ९ ॥
मन्त्रोपनिषदं ब्रह्म पदक्रमसमन्वितम् ।
पठन्ति भार्गवा ह्येते अथर्वाणो भृगूत्तमाः ॥ १० ॥

इति मन्त्रिकोपनिषदि प्रथमः खण्डः ॥

॥ अथ द्वितीयः खण्डः ॥

सब्रह्मचारिवृत्तिश्च स्तम्भोऽथ फलितस्तथा ।
अनड्वान् रोहितोच्छिष्टः पठ्यते बहुविस्तरे ॥ १ ॥

शास्त्रप्रवीणाः होतृमैत्रावरुणादयः अनुशंसन्ति । 'स्तुतमनुशंसन्ति' इति श्रवणादुद्गातृगणैः सामभिः स्तुता देवता होतृगणैः ऋग्भिः शंसनीया । ततश्च सूक्तस्तोत्रशस्त्राणि एतद्विषयाण्येवेति भावः ।

रथन्तरं । रथं तरबृहत्सामादिकं यस्मिन् विषये गीयत इत्यर्थः ॥

मन्त्रोपनिषदं भृगूत्तमाः । पदक्रमसमन्वितं मन्त्रोपनिषदाख्यं **ब्रह्म** वेदं भृगूणां मध्ये उत्तमा भार्गवा **एते** अथर्ववेदाध्यायिनः पठन्तीत्यर्थः । ततश्चाथर्वशिखाध्यायिभिरेवेयमुपनिषदध्येतव्येत्यर्थः ॥१०

॥ इति मन्त्रिकोपनिषत्प्रथमखण्डप्रकाशिका ॥

परमात्मनः सर्वात्मतामाह **सब्रह्मचारिवृत्तिश्च बहुविस्तरे** । स्तम्भुर्गत्यर्थो हिंसार्थो वा । **रोहितोच्छिष्टः** । उच्छिष्टोऽवशिष्टः । रोहितश्च उच्छिष्टश्च रोहितोच्छिष्टः ? इति यावत् । बहुविस्तरे शास्त्रे ये पाठ्यते(ये पठ्यन्ते?), ते सर्वेऽपि स एवेत्यर्थः ॥ १ ॥

सब्रह्मचारिवृत्तिश्चेत्यादिना ब्रह्मणः सर्ववस्तुसामानाधिकरण्यं प्रदर्श्य, 'नैतत् वस्त्वैक्यनिबन्धनम्, किन्तु शरीरात्मभावकृतम्'

[कालः प्राणश्च भगवान् मृत्युः शर्वो महेश्वरः ।
उग्रो भवश्च रुद्रश्च ससुरः सासुरस्तथा ॥ २ ॥
प्रजापतिर्विराट् चैव पुरुषः सलिलमेव च ।]
स्तूयते मन्त्रसंस्तुत्यैरथर्वविहितैर्विभुः ॥ ३ ॥
तं षड्विंशकमित्येके सप्तविंशमथापरे ।
पुरुषं निर्गुणं सांख्यमथर्वशिरसो विदुः ॥ ४ ॥
चतुर्विंशतिसंख्यातमव्यक्तं व्यक्तमुच्यते ।

स्तूयते...विभुः। मन्त्रसंस्तुत्यैः मन्त्र इति संस्कृतशब्दवाच्यैः। मन्त्रैरिति यावत्। अथर्वविहितैर्मन्त्रैः स एव परमात्मा स्तूयत इत्यर्थः ॥ ३ ॥

तं....विदुः। निर्गुणं सत्त्वरजस्तमोगुणातीतं तमेव परमात्मानं षड्विंशं [विदुः] । परमात्मा षड्विंश इत्यर्थः । षड्विंशवादिनाञ्च कालतत्त्वमेष्वेव विशेषणतया अन्तर्गतमित्यभिप्रायः । **सप्तविंशमथापरे** कालपार्थक्यवादिन इति भावः ॥ ४ ॥

चतुर्विंशति...मुच्यते । व्यक्ताव्यक्तरूपतया चतुर्विंशतिसंख्यातमपि तदेवात्मतत्त्वमुच्यत इत्यर्थः । तस्यैव ब्रह्मणः अव्यक्तव्यक्तशरीरकत्वादिति भावः ।

इत्युपदेशार्थम् अचेतनातिरिक्तजीवाधिकत्वं ब्रह्मणि ज्ञाप्यते, तं षड्विंशकमित्यादिना । अथर्वशिरस इति । अथर्वोपनिषत्त इत्यर्थः ।

चतुर्विंशतिसंख्यातमित्येतत् पञ्चविंशस्य जीवस्याप्युपलक्षणम्। यद्वा पुरुषं निर्गुणं सांख्यमिति जीवात्मकथनम् । अत एव सांख्यमिति विशेषणमपि सार्थकम्। सांख्यशास्त्रे युक्त्या साधितमपि वेदादेव प्रतिपद्यन्ते प्रमाणिकाः तदुक्तम्, 'श्रौतीमेवात्मसिद्धिं श्रोत्रियाः संगिरन्ते' इति। अत एवाथर्वशिरोरूपवेद्यत्वमेवाहत्य सांख्यप्रक्रियासिद्धिनिरसनं शारीरके। तथाच चेतनाचेतनाधिकोऽपि

अद्वैतं द्वैतमित्याहुस्त्रिधा तं पञ्चधा तथा ॥ ५ ॥
ब्रह्माद्यं स्थावरान्तं च पश्यन्ति ज्ञानचक्षुषः ।
तमेकमेव पश्यन्ति परिशुद्धं (शुभ्रं) विभुं द्विजाः ॥ ६ ॥

अद्वैतं...सप्तधा । तमेव परमात्मानं चिदचिद्विशिष्टमभिप्रेत्य तस्यैकत्वादद्वैतमित्याहुः, 'एकमेवाद्वितीयम्' इत्याद्याः काश्चन श्रुतयः । काश्चन, 'पृथगात्मानं प्रेरितारं च मत्वा' इत्याद्याः श्रुतयः विशेषणविशेष्यभेद-विवक्षया द्वैतम् । [अतोऽस्यैतावद् अद्वैतं द्वैतमित्याहुः ।] केचित्तु, 'भोक्ता भोग्यं प्रेरितारम्' इति चिदचिदीश्वरभेदेन त्रिरूपम् । व्यक्ता-व्यक्तकालजीवेश्वररूपेण पञ्चविधं केचिदाहुः । तमेव पञ्चधा पञ्चभूता-त्मकतया, सप्तधा सप्तलोकात्मकतया चाहुरित्यर्थः ॥ ५ ॥

ब्रह्माद्यं ... द्विजाः । ब्रह्मादिस्थावरान्तान्तर्यामिणं व्यापकं परि-

---

चेतनाचेतनयोश्चिदचित्सामानाधिकरण्येन व्यपदिदश्च इत्यर्थः । एव-मर्धद्वयेन चेतनाचेतनात्मकत्वं ब्रह्मण्युक्तम् । एवं पञ्चविंशस्य पुरुषस्य चतुर्विंशतेश्चेतनानां च व्यक्ताव्यक्तानां प्रधानं तु परमात्मनः षड्विंशत्वमुपपादितं भवति । पञ्चधा सप्तधेत्यस्यैवं त्वर्थो भवितुमर्हति—तत्त्वत्रयवादवत् अर्थपञ्चकवादस्यापि दर्शनात् पञ्चधा प्रसारावस्थितम् । अथवा व्यक्तानां त्रयोविंशतिसंख्यातानां व्यक्तपदेन क्रोडीकारे व्यक्ताव्यक्तकालजीवपरमात्मरूपेण पाञ्चविध्यम्, व्यक्ता-व्यक्ताक्षरतमोजीवकालपरमात्मरूपेण साप्तविध्यमिति । एवं प्रकृति-नित्यविभूतिकालजीवपरमात्मभेदेन वा प्रकृतिकालजीवधर्मभूतज्ञान-परमात्मभेदेन वा पाञ्चविध्यम्; व्यक्ताव्यक्तनित्यविभूतिधर्म-भूतज्ञानजीवपरमात्मभेदेन च साप्तविध्यमित्याद्यपि द्रष्टव्यम् । ५-६

ब्रह्माद्यमिति । अत्र सर्वे पश्यन्तीति पश्यन्ति हि श्रवणात्

यस्मिन् सर्वमिदं प्रोतं ब्रह्म स्थावरजङ्गमम् ।
तस्मिन्नेव लयं याति स्रवन्त्यः सागरे यथा ॥ ७ ॥
यस्मिन् भावाः प्रलीयन्ते लीनाश्चाव्यक्ततां ययुः ।
पश्यन्ति व्यक्ततां भूयो जायन्ते बुद्बुदा इव ॥ ८ ॥

शुद्धमेकमेवाऽऽत्मानं ज्ञानचक्षुषः पश्यन्तीत्यर्थः ॥ ६ ॥

यस्मिन् —अत्र ब्रह्मशब्देन जीवजातमुच्यते । स्थावरजङ्गमात्मकमिदं सर्वं ब्रह्मवज्जात (ब्रह्म जीवजातं ?), यस्मिन् प्रोतं= यत्सङ्कल्पेन धृतम् —यदात्मकमित्यर्थः—तस्मिन्नेव लयं याति। ततश्च उपादानत्वान्तर्यामित्वयोरैकाधिकरण्यमुक्तं भवति । **स्रवन्त्यः सागरे यथा** । स्रवन्त्यः नद्यः समुद्रे यथा लयं यान्तीत्यर्थः ॥ ७ ॥

यस्मिन्...बुद्बुदा इव । यस्मिन् आत्मनि भावाः वियदादिपदार्थाः प्रलीयन्ते, प्रलीनाश्च सन्तः शब्दस्पर्शादिशून्याः पृथगुपलम्भानर्हाः अविभक्तनामरूपाः, 'तमः परे देव एकीभवति' इति श्रुत्यनुरोधेनाविभक्ततमोवस्था भवन्ति— तत्रैव परमात्मनि सर्गादिसमये बुद्बुदा इव पुनर्जायन्ते, व्यक्ताश्च भवन्ति । ततश्च लयाधारस्य परमात्मन एवोत्पत्त्युपादानत्वमिति भावः ॥ ८ ॥

पूर्वार्धं पृथग्वाक्यम्, तथोत्तरार्धमिति ज्ञायते । तत्र पूर्वार्धेन ब्रह्मणः देहविशिष्टात्मरूपव्यष्टिजीवान्तर्यामित्वमुक्तम्। पूर्वं तु पुरुषमिति चतुर्विंशतीति च अर्धाभ्यां शुद्धचेतनाचेतनान्तर्यामित्वमुक्तमिति विशेषः। तमेकमित्युत्तरार्धेन एव सर्वान्तर्यामित्वे सत्यपि तत्तत्तदोपसृष्टस्वरूपो विभवो वर्ण्यते इति वक्तव्यम् । भाष्ये पूर्वोत्तरार्धयोरैकवाक्यतादर्शनात् पश्यन्तीति पदमेकमेव स्यादिति, पाठो निरीक्ष्यः।
यस्मिन् सर्वमित्यादिना उपादानकारणत्वमुच्यते । ७–८

क्षेत्रज्ञाधिष्ठितश्चैव (श्चैव) कारणैर्भिद्यते पुन ।
एव स भगवान् देव पश्यत्यस्य पुन पुन ॥ ९ ॥
ब्रह्म ब्रह्मन् यथा (ब्रह्मत्यथो) यान्ति ये विदुर्ब्राह्मणास्तथा।
अत्रैव ते लय यान्ति लीनाश्चाव्यक्तशालिन ॥
लीनाश्चाव्यक्तशालिन (नाव्यक्तशायिन ?) इति ॥ १० ॥
इति मन्त्रिकोपनिषदि द्वितीय खण्ड ॥
इति मन्त्रिकोपनिषत् सपूर्णा
॥ शुभमस्तु ॥

क्षेत्रज्ञ...पुन। । उत्पन्नाश्च महदाद्या क्षेत्रज्ञविशेषैरधिष्ठिताश्च सन्त पुनश्च नाशकारणैर्भिद्यन्ते नाश्यन्त इत्यर्थ । एव—पुन पुन । एव परमात्मा अस्य प्रपञ्चस्य पुन पुन उत्पत्तिविनाशावेव पश्यति सङ्कल्पयतीत्यर्थ ॥ ० ॥

यथा येन प्रकारेण ब्रह्मन् ब्रह्मणि ब्रह्म प्रकृतिर्जीवभूत ब्रह्म लय याति,—यान्तीति वचन व्यत्ययश्छान्दस —तथा ये विदु , ते अत्रैव ब्रह्मणि लीना ब्रह्मण पृथगव्यक्ता एव शेरते न कदाचिदपि ॥

इति मन्त्रिकोपनिषद्भाष्य द्वितीयखण्डप्रकाशिका ।
इति श्रीमत्तातार्यचरणारविन्दचञ्चरीकस्य वात्स्यानन्तार्य
पादसेवासमधिगतशारीरकमीमासाभाष्यहृदयस्य
परकालमुनिपादसेवासमधिगतपारमहस्यस्य
श्रीरङ्गरामानुजमुनेः कृतिषु
मन्त्रिकोपनिषत्प्रकाशिका सपूर्णा ।

'एवं स भगवान्' इति प्रजाद्यैश्वरपक्षनिरसनेन ब्रह्मण , भगव

वासुदेवरूपत्वेन ध्यानक्रियाभ्यां भगवानिति पूर्वमेव दर्शितस्य नित्यैश्वर्यं निरूपितम् । ९

एवं शेरते नेत्येव पाठदर्शनात् ब्रह्मणि लीनाः पश्चात् दृश्यमानरीत्या नाव्यक्तशायिन इत्यर्थः स्यात् । अव्यक्तशालिन इति । 'अव्यक्तमव्यक्ततामेवं शाडन्ते श्लाघन्ते इति अव्यक्तशालिनः । शाडृ श्लाघायाम् । डलयोरभेदात् काश्यपमतमत्र स्तनम्' इति व्याख्येयम् ।

ईश धु निपद्भाष्यपरिष्कारविधायिना ।
श्रीमच्छुत्यन्तसौमित्रिरङ्गलक्ष्मणसेविना ॥
श्रीवीरराघवार्येण वात्स्यसच्चक्रवर्तिना ।
मन्त्रिकोपनिषद्भाष्यपरिष्कारो व्यतन्यत ॥

इति श्रीशान्त्यवीरराघवाचार्यकृतिषु
मन्त्रिकोपनिषद्भाष्यपरिष्कारः
॥ श्रीरस्तु ॥

मन्त्रिकोपनिषदर्थसंग्रहकारिका

याजुषी चाऽऽथर्वणी च मन्त्रिकोपनिषन्मता ।
खण्डद्वयात्मना तस्या विभागमपि मन्वते ॥ १ ॥
भगवत्प्रेर्यमाणैव प्रकृतिः परिणामिनी ।
जीवात्मनां भोगहेतुः तस्य लीलारसप्रदा ॥ २ ॥
सर्वश्रुतिभिरुद्घुष्टः सर्वात्मा च स्तुतः परः ।
षड्विंशत्वादिना नूनं पृथग् दृश्यो जगन्मयः ॥ ३ ॥
निमित्तवत् उपादाने क्षेत्रज्ञैर्भगवानयम् ।
परिशुद्धो ध्यातुमर्हो नित्यैश्वर्यं इहोच्यते ॥ ४ ॥

शारीरके मन्त्रिकोपनिषद्वाक्यस्थलम्

म. १. १-४-६.

मन्त्रिकोपनिषद्विषयः— प्रकृतिपुरुषातिरिक्तब्रह्मप्रतिबोधनम्

मन्त्रिकोपनिषद्गतानि ऋष्यादिनामानि

मन्त्रिकोपनिषद्	586-596	सांख्यं	592
स्नातकाध्वर्यवः	590	अथर्वशिरसः	,,
बह्वृचाः	,,	चतुर्विंशतिसंख्यातम्	,,
अथर्वणो भृगूत्तमाः	591	अद्वैतम्	593
षड्विंशकः	592	द्वैतम्	,,
सप्तविंशः	,,		

मन्त्रिकोपनिषन्मन्त्रसूची

अशक्यः	587	पिबन्त्येनां	589
अष्टपादं	585	प्रजापति	592
कालः प्राणश्च	592	ब्रह्म ब्रह्मन्	595
क्षेत्रज्ञा	595	ब्रह्माद्यं	593
गौरनाद्यन्त	588	भूतसंमोह	587
चतुर्विंशति	592	मन्त्रोपनि	591
तं षड्विंश	,,	यस्मिन् भावाः	594
ध्यानक्रिया	590	यस्मिन् सर्वं	,,
ध्यायते	588	शंसन्त	590
पश्यन्त्यस्यां	590	सब्रह्म	591